# संस्कृत-वार्ताः

दिनाङ्क :- 12.06.2025 प्रातः:- 06:55

## अथवार्ताः

### मन्त्रिमण्डलनिर्णयः

केन्द्रीय-मन्त्रिमण्डलेन रेलमन्त्रालयस्य द्वे परियोजने अनुमोदिते। एतयोः परियोजनयोः कुलव्ययः पञ्चोत्तर-चतुश्शत-कोटिरूप्यकाणि वर्तते। अनयोः परियोजनयोः अन्तर्गतं कोडरमा- बरकाकाना अथ बल्लारी-चिकजाजुर्-रेलमार्गयोः डबलिंग अर्थात् द्विविधिकरणं वर्तते। नवदिल्ल्यां मन्त्रिमण्डलस्य उपवेशनानन्तरं सूचना-प्रसारणमन्त्री अश्विनी वैष्णव: अवोचत् यत् कोडरमा- बरकाकाना परियोजनया त्रयस्त्रिंशदुत्तरैकशतं किलोमीटर-मितेन रेलमार्गेण अष्टत्रिंशदुत्तरनवशतं ग्रामाणां पञ्चदश लक्षजनाः लाभान्विताः भविष्यन्ति।

श्री वैष्णवः अवदत् यत् पञ्चाशीत्युत्तरैकशतं किलोमीटर-मितायाः बल्लारी-चिकजाजुर्-परियोजनया मङ्गलौर-पोर्ट इति स्थलात् सिकन्दराबादं यावत् सम्पर्को भविष्यति । अस्मिन् विषये प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् नूतन रेल परियाजनाभ्यां सम्पर्क: व्यापार: स्थिरता च समेधयिष्यत्ते।

### केन्द्रम् खाद्यतैलम्

केन्द्रेय अशोधित खाद्य तैल मूल्ये सीमा शुल्कं प्रतिशतं विशति: मितात् दश प्रतिशन्मितं कृतम्। अनेन निर्णायेन अशोधित खाद्य तैलेषु आयात शुल्कस्म अन्तरं अष्टदमशलव सप्त पन्च प्रतिशतात् नवदश दशमलव द्वि पन्च प्रतिशतं यावत् सनजातम्। उपभोक्ता-खादय वितरण मन्त्रालयेन उक्तं यत् अस्य उद्देश्यं खाद्य तैल मूल्ये नैयून्यं विधाय उपभोक्तृभ्य: साहाय्य-प्रदानं मुद्रा स्फीतौ च नियन्त्रणं वर्तते।

### यू.जी.सी

यू.जी.सी इति विश्व-विद्यालयानुदानायोगेन तानि संस्थानानि निर्देशिता नि एटी-रैगिंग अंडरटेकिंग अथ अनुपालन अंडरटेकिंग प्रदांतु विफलानि सान्ति। तानि संस्थानि त्रिंशत् दिनावधौ छात्रेभ्य: ऑनलाइन माध्येन प्राप्य यू.जी.सी. इत्यस्मै यच्छत्रु। सममेव संस्थानानां परिसरे रैगिंग वारयितुं विहितापायानां प्रतिवेदनम् आपि प्रदातुं निर्देशितम् विश्वविद्यालयानुदानायोगेन सं चेतितं यादि निर्धारितावधौ अस्य पालनं नैव क्रियते चेत् कार्याचरणं भविष्याति। कार्याचरणे यू.जी.सी इत्यस्य अनुदानस्य प्रत्यावर्तनम् अपि सम्मिलितमास्ति।

### प्रधानमन्त्री दिल्ली भाजपा

प्रधानमन्त्री नरेन्द्र मोदी गतदिने राजधाचां नवदिल्यां भाजपेति दलस्य संसद-सदस्यै: च सह संवादम् अकरोत्। एकस्मिन् सोशल-मीडिया पोस्ट इत्यत्र श्री मोदी अवोचत् यत् संवादक्रमे दिल्ली वासिनां जीवन स्तरोन्नयन विषये चर्चा जाता। अत्रावसरे दिल्लया: मुख्यम-श्री रेखा गुप्ता अपि उपस्थित आसीत्।

### ऋतुसञ्चेतना

ऋतुविज्ञानविभागेन उक्तं यत् दक्षिणपश्चिम-प्रावृट्-सक्रियं वर्तते। अतः कोङ्कणे गोवायां च कतिपयेषु स्थानेषु अतिवृष्टेः सम्भावना वर्तते। उत्तरभारतस्य अधिकांशभागेषु तीव्रतापतरङ्गः व्याप्तः अस्ति, यत्र तापमानं सामान्यतः अधिकं वर्धितम् ।

### क्रिकेट्

आई.सी.सी वल्ड-टेस्ट चैम्पियनशिप इति स्पर्धायां प्रथमदिवसे क्रीडावसानं यावत् दक्षिणअफ्रीका दलेन चतु.क्रीडकजां दानौ त्रयश्चलादिंशत् धावनाड्.का: निर्मिता:। इत: पूर्वम् ऑस्ट्रेलिया दलेन प्रथम पाल्यां द्वादशोत्तर द्विशतं धावनाड.का. निर्मिमा:।

## हॉकी

एफ.आई.एच. हॉकी प्रोलीग इत्यत्र भारतीय पुरुषदलम् अद्य सायं अर्जेंटीना दलेन सह क्रीडिष्यति। इयं स्पर्धा नीदरलैण्डस्य एम्सटेलवीन-नगरे वेगनर हॉकी स्टेडियम इत्यत्र भविष्यति। भारतीय-समयानुसारेण सायं सार्ध षड् वादने स्पर्धा आरप्स्यते।